International Journal of Sanskrit Research 2022; 8(5): 25-30

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(5): 25-30
© 2022 IJSR
www.anantaajournal.com
Received: 22-05-2022
Accepted: 27-06-2022

**Dr. Hemanta Dutta**
Assistant Professor, Department of Sanskrit, Government General Degree College, Lalgarh, Jhargram, West Bangal, India

**Corresponding Author:**
**Dr. Hemanta Dutta**
Assistant Professor, Department of Sanskrit, Government General Degree College, Lalgarh, Jhargram, West Bangal, India

# ऋग्वेदे अलङ्कारविमर्शः

**Dr. Hemanta Dutta**

## प्रस्तावना

अलङ्करोतीत्यलङ्कारः, अलङ्क्रियतेऽनेनेति वा । उभयत्राप्यलङ्करणसाधनमलङ्कार इति स्वीक्रियते।अलङ्काराणां काव्ये महन्महत्त्वमस्ति। यथा सर्वगुणसमन्वितोऽपि नरो निर्वसनो न शोभते,अलङ्काररहीना नारी यथा न शोभते तथैवालङ्काररहितं काव्यम्। उक्तञ्च दण्ड्याचार्येण कव्यादर्शे-

"काव्यशोभाकरान्धर्मानलङ्कारान्प्रचक्षते[1]" इति

अलङ्कारो न कोवलं सौन्दर्यं समेधयति,अपि तु तत्र चमत्कृतिमप्यादधाति।रसाद्युत्कर्षजनकत्ये सति शोभातिशायिकाव्यधर्मत्वमलङ्कारत्वमिति।उक्तञ्च मम्मटाचार्येण-

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हरादिवदलङ्कारास्तेऽनुप्राससपमादयः।।[2] इति

अर्थाद्यथा हारादयः कण्ठाद्यङ्गानामात्मनश्चातिशयाधानद्वारेणोपकाकास्तथैव शब्दार्थद्वारेण धर्मा अङ्गिनं रसमुपकुर्वन्ति तेऽनुप्रासोपमादयः 'अलङ्कार' पदेनोच्यते ।
विश्वनाथमतेनालङ्कारा अङ्गादिच्छब्दार्थयोः शोभावर्धकाः, रसादीनाञ्चोपकर्तारश्च। प्रसादादिगुणवद् अनपरिहर्यत्वादेतेऽलङ्कारा अस्थिरधर्माश्चेति। अतश्चोक्तम् –

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीमुपकुर्वन्तोऽलङ्कारास्तेऽङ्गादिवत् ।।[3] इति

लौकिककाव्येषु यथोपमारूपकाद्यलङ्काराणां परिचयःप्राप्यते ऋग्वैदिकमन्त्रेऽपि तथैव दरीदृश्यते। किञ्च वैदिकालङ्कारेषु यत् सौष्ठवं,यदार्जवं यत् पाटवञ्च शोभते न तत्रान्यत्र प्राप्यते। वेदे ऋषिभिः सुललितैर्भावभव्यैः शब्दैर्नैके देवाःसादरं स्तुतास्सन्ति। मन्त्रेषु तादृशं सौष्ठवं वैलक्षणञ्च प्राप्यते यत्तेन विदुषां मनांसि समाकृष्यन्ते। ऋषयो भावाभिव्यक्तीकरणे परमपटव आसन्। यत्र तत्रान्तर्भावानामभिव्यक्तीकरणाय अलङ्कारविधानेऽपि ते पराङ्मुखा नासन्। अतो वेदमन्त्रेष्वपि नैकेऽलङ्कारा दरीदृश्यन्ते।

**उपमा**

वैदिकर्षीणामुपमाऽतिप्रियोऽस्ति,यस्योदाहरणानि नैकेषु मन्त्रेषु सुचारुतया दरीदृश्यन्ते। आनन्देन सिक्तहृदयमुनेर्वाणी आत्मानं विभुषयितुं मधुरमयानन्दस्य बोधं करोति। वेदमन्त्रेषु 'उपमा'शब्दस्यैव बहुत्र प्रयोगो दृश्यते। उपमा अस्य विष्ठाः [4], पदं यद्विष्णोरुपमम् [5], युवाभ्यां मित्रावरुणोपमं धेयामृचा [6], का वां भदुपमातिः[7] इत्यादयः।

साहित्यदर्पणकारेण विश्वनाथेन उपमालङ्कारस्य लक्षणविषये कथितं यत्- साम्यं वाच्यमवैधर्म्यं वाक्यैक उपमा द्वयोः[8] । लौकिककाव्येषु यथोपमालङ्कारस्य पूर्णोपमा-लुप्तोपमा-श्रौती-आर्थी-वाक्यगा-समासगा-तद्धितगादयो भेदाःप्राप्यन्ते वेदेष्वपि एतेषामुदाहरणानि दरीदृश्यन्ते। उपमावाचकशब्दविषये उल्लिखितमस्ति यत्- इव-न-चित्-नु प्रायेणोपमार्थे भवन्ती [9]ति। अथर्ववेदेऽपि प्राप्यते- इव-न-चित्-नु-था-आ-वा-मोष-रुप-वर्ण-वत्-सदृश-सम-अथ-समान [10]इत्येतेषां शब्दानामुपमावाचकत्वमिति।

वैदिक ऋषिः कविषु कविरस्ति। स प्रेमोपासको क्रान्तदर्शी सौन्दर्यसेविषु शिरोमणिश्चापि । सूक्ष्मातिसूक्ष्मवर्णणे तथा चोपमाप्रदर्शने ते सिद्धहस्ता आसन्। तद्यथा-

अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम्
जायेव पत्य उशती सुबासा उषा हस्रेव निरिणीते अप्सः।।[11]
इति

उषा कदाचिद् भातृहीना भगिनीव स्वदायभागमवाप्तुं पितृस्थानीयसूर्यस्य समीपे समायाति,कदाचित् सुवस्त्रं परिधाय पतिं स्वानुरागरज्जौ संयमनाय कमनीया कामिनीव स्वपत्युः सविधे स्वीयसौन्दर्यं प्रकटीकरोति। केषाञ्चन मन्त्राणामुल्लेखः क्रियते यत्रोपमालङ्कारोऽस्ति। तद्यथा-

अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः।
सम्राजन्तमध्वराणाम्।। [12]इति

अत्र उपमानम्-वारवन्तमश्वम्,उपमेयम्-अग्निम्,साधारणधर्मः-सम्राजन्तम्, सादृशवाचकशब्दः-न । अतो मन्त्रेऽस्मिन् वाक्यगाश्रौतीपूर्णोपमाऽलङ्कारोऽस्ति।

यस्य मा परुषाः शतमुद्धर्षयन्त्युक्षणः।
अश्वमेधस्य दानाःसोमा इव त्र्याशिरः।। [13]इति

मन्त्रेऽस्मिन् उपमानम्-त्र्याशिरःसोमः,उपमेयम्-शतम् उक्षणः, साधारणधर्मः-मा उद्धर्षयन्ति, सादृशवाचकशब्दः-इव इति विद्यन्ते। अत्रापि पूर्णोपमालङ्कारः।

उपर्युक्तेषूदाहरणेषूपमालङ्कारस्य चत्वार्यैवाङ्गानि (उपमानमुपमेयं साधारणधर्मस्सादृश्यवाचकशब्दश्च) वर्तन्ते। अतः पूर्णोपमालङ्कार इति। वेदे लुप्तोपमाया अपि बह्वन्युदाहरणानि प्राप्यन्ते।अर्थाच्चतुर्ष्वङ्गेषु कस्यचिदेकस्य द्वयोर्वाऽभावे लुप्तोपमालङ्कारो भवति। यथा-

तस्य ज्येष्ठं महिमानं वहन्तीः
हिरण्यवर्णाः परियन्ति यह्वीः।[14]

मन्त्रेऽस्मिन् उपमानम्-हिरण्यम्, उपमेयम्-यह्वीः, साधारणधर्मः-वर्णाःपरियन्तीत्येतानि विद्यन्ते, परन्तु सादृशवाचकपदं नास्ति।अतो मन्त्रेऽस्मिन् लुप्तोपमालङ्कारः।अपि च हिरण्यवर्णा इत्यत्र समासत्वात् समासगावाचकलुप्तोपमेति।

ऋतस्य देवा अनुव्रता गुर्भुवत् परिष्टिर्द्यौर्न भूम [15]इत्यत्र आकाशं यथा कृत्स्नं पृथिवीं व्यप्तीकरोति तथैवाग्निरपि सर्वत्र व्यापनशीलोऽस्तति। मन्त्रेऽस्मिन् उपमानम्-द्यौः,साधारणधर्मः-भूम, सादृशवाचकपदं- न। परन्तूपमेयस्याग्निरित्यस्याऽभावादुपमेयलुप्तोपमालङअकारोंऽस्ति ।

एवं प्रकारेण ऋग्वैदिकमन्त्रे उपमाऽलङ्कारस्य बह्वन्युदाहरणानि प्रप्यन्ते। ऋग्वैदिकमन्त्रेषु मानवजीवन-प्रकृति-सामाजिकवर्ग-यज्ञसम्बद्धादिविषये उपमानानां प्रयोगो दरीदृश्यते। प्राधान्येन च ऋषयः स्वोपमानं सञ्चयितुमिन्द्र-अग्नि-सर्य-सोमादिदेवानामवलम्बनमकुर्वन्। एतेषां देवानां स्तुति-निन्दा-प्रशंसा-आशीर्वाद्-अभिशापादिमुखेनैवोपमाद्यलङ्काराणां प्रयोगश्चक्रिरे।

**रूपकम्**

न केवलमुपमाऽलङ्कारस्य बाहुल्यमपि तु रूपकाद्यलङ्काराणामपि भूयान् प्रयोगो दरीदृश्यते। रूपकालङ्कारस्य लक्षणविषये साहित्यदर्पणकारेण विश्वनाथेनोक्तं यत् - रूपकं रूपितारोपो विषये निरपह्नवे[16] इति। अर्थाद् यत्रोपमानोपमेययोरभेदो दृश्ते तत्र रूपकनामालङ्कारो भवतीति। ऋग्वेदमन्त्रेषु प्राप्तानि रूपकालङ्कारस्य कानिचनोदाहरणानि प्रदर्श्यन्ते। यथा-

दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः।
नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि।। [17]इति

अस्मिन् मन्त्रे सूर्य आकाशस्य स्वर्णिमो मणिरस्तीति रूपकं कल्पितं वर्तते। रूपकस्य प्रसिद्धमुदाहरणं कठोपनिषदि प्राप्यते रथरूपककल्पनावसरे। यथा-

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।
इन्द्रियाणि हयानाहुर्विषयाँस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।। [18] इति

अत्र आत्मा-रथी, शरीरम्-रथः,बुद्धिः-सारथिः,मनः-प्रग्रहम्,इन्द्रियाणि-हया इत्यादिरूपेण शरीरेण साकं रथस्य रूपकं कल्पितमस्ति।

नारीणां हृदयवर्णनाविषये रूपकमाश्रित्यैवमुक्तमृषिणा- न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयाण्येता [19]इति।

**अतिशयोक्ति**

ऋग्वैदिकमन्त्रा मूलतोऽतिशयोक्तिमूलकाः। तत्र देवानां स्तुत्यावसरे इष्टप्रस्यर्थं बहुभिरतिशयोक्तियुतवाक्यैः ऋषिभिस्स्तुतिः क्रियते। अतः अतिशयोक्तिनामालङ्कारोऽपि भूयानुपलभ्यते वेदमन्त्रेषु। अलभ्कारस्यास्य लक्षणरूपेण साहित्यदर्पणकारेण विश्वनाथेनोक्तम्- सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते[20]इति। अर्थादुपमेयस्य निगरणपुरस्सरमपमानेन सह तस्याभेदज्ञानमध्यवसायः। तथाभूतस्याध्यवसायस्यसिद्धत्वे सति अतिशयोक्तिनामालङ्कारो भवतीति। उदाहरणं यथा-

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्योऽभिचाकशीति।। [21] इति

अर्थात् सुष्ठुपक्षधरौ सहवासिनौ समख्यातौ द्वौ पक्षिणौ एकस्यैव वृक्षस्योपरि स्थतौ स्तः। तयोरेकः सुस्वादुफलं भुङ्क्ते, अन्यस्त्वभूक्त्वैव वर्तमानोऽस्ति। अत्र पक्षिद्वयस्योपमानेन जीवात्मापरमात्मारूपोपमेयस्य निगरणत्वेनाऽतिशयोक्तिरलङ्कारोऽस्ति।
अतिशयोक्त्यलङ्कारस्यापरमुदाहरणम् –

चत्वारि श्रृङ्गास्त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासोऽस्य।
त्रिधा बद्धो वृषभो रोरवीति महा देवो मर्त्याँ आविवेश।। [22] इति

मन्त्रेऽस्मिन्नतिशयोक्तिमूलकैर्वाक्यैः सायणाचार्यानुसारेण यज्ञस्य, महाभाष्यकारानुसारेण शब्दस्य, राजशेखरानुसारेण काव्यस्य स्तुतिः कृतास्ति।

**व्यतिरेकः**

व्यतिरेतालङ्कारस्यापि निदर्शनमृग्वैदिकमन्त्रेषूपलभ्यते। यथा –

द्वादशारं न हि तज्जराय वर्वर्ति चक्रं परि धमृतस्य।
आ पुत्रा अग्ने मिथुनासोऽत्र सप्त शतानि विंशतिश्च तस्थुः।।[23]

अर्थात् सत्यात्मकादित्यस्य द्वादशारयुतऋतचक्रं स्वर्गं जरया विनैव भ्रमति। हे अग्ने चक्रेऽस्मिन् पुत्रकल्पा विंशत्युत्तरं सप्तशतं मिथुना निवसन्ति। अ ऋतचक्रस्य वर्णने व्यतिरेकालङ्कारोऽस्ति।

मूरा अमूर न वयं चिकित्वो महित्वमग्ने त्वमग्निवित्से [24] इत्यस्मिन्मन्त्रेऽपि व्यतिरकालङ्कारो वर्तते।

**समासोक्ति**

समानकार्यलिङ्गविशेषणान्यतमद्वारा प्रस्तुते पदार्थेऽप्रस्तुतपदार्थस्य व्यवहारारोपे समासोक्तिर्नामालङ्कारः स्यात्। ऋङ्मन्त्रेऽपि एतादृशः प्रयोगो दृश्यते। यथा –

तनुनपात् पवमानः श्रृङ्गे शिशानो अर्षति [25] इत्यस्मिन्मन्त्रे प्रस्तुते सोमे श्रृङ्गे शिशानः इति विशेषणेनाप्रस्तुतस्य वृषभस्य व्यवहारसमारोपत्वात् समाससोक्त्यलङ्कारः ।

**विशेषोक्ति**

अलङ्कारस्यास्य लक्षणं विश्वनाथकविराजेनैवमकारि –सति हेतौ फलाभावो विशेषोक्तिरिति।[26] अर्थाद् हेतौ कारणे सत्यपि फलस्य कार्यस्याभावो वर्ण्यते चेत्तर्हि विशेषोक्तर्नामालङ्कारो भवेत्। यथा-

उत त्वः पश्यन्न ददर्श वाचम्
उत त्वः श्रृण्वन्न श्रृणोत्येनाम्।[27]

मन्त्रेऽस्मिन् ऋषिः वाग्विषये प्रतिपादयति – कश्चिदेनां पश्यन्नपि न पश्यति, कश्चित्त्वेनां वाचं श्रृण्वन्नपि न श्रृणोतीत्यर्थः।अत्र दर्शन-श्रवण-व्यापाररूपहेतोः सद्भावेऽपि दर्शनश्रवणकार्ययोरभावाद् विशेषोक्त्यलङ्कार इति।

**विभावना**

प्रसिद्धकारणाभावे कार्योत्पत्तिप्रतीतिर्विभावना। यथोक्तं दर्पणकारेण – विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते।[28] इति ऋग्वेदमन्त्रेऽपि एतादृशस्यालङ्कास्य प्रयोगो दृश्यते। यथा –

अहस्तासो हस्तवन्तं सहन्ते ।[29] इत्यत्र विजयस्य साधनं हस्तः। तदभावेऽपि अक्षैः हस्तवतः कितवस्य पराभवोऽत्र वर्णितः। एवं हस्तरहितैरक्षैः कितवस्य पराभववर्णनादत्र विभावनानामालङ्कारः।

**निदर्शना**

यस्य छाया ऽमृतम्[30] इत्यत्र छायाऽन्या, अमृतञ्चान्यत्। तथापि छाया अमृतमित्युक्ता।

अभवन् वस्तुसम्बन्ध उपमापरिकल्पक[31] इति लक्षणेन यस्य छायाऽमृततुल्येतत्युपमायां पर्यवसानम्।

एवञ्च छायामृतयोरौपम्यं साम्यं सद् हृदयगम्यं भवति। अतो निदर्शनाऽलङ्कारः।

**यमकम्**

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तनैवावृत्तिर्यमकं विनिगद्यते।।[32] इति

साहित्यदर्पणवचनानुसारेणानेन यत्रार्थे सति भिन्नार्थायाः स्वरव्यञ्जनसमुदायस्य पूर्वोपात्तक्रमेणैवावर्तनं भवति तत्र यमकालङ्कारो भवति। ऋग्वेदस्य नैकेषु मन्त्रेषु यमकालङ्कारस्य निदर्शनं प्राप्यते। यथा –

चर्षणीधृतं राजानं चर्षणीधृतम् [33] इत्यस्मिन्मन्त्रे यमकालङ्कारो वर्तते। अत्र सायणभाष्यम्-चर्षणीधृतम् मनुष्याणामुदकप्रेरणेन

धारकमिति प्रथमम्। द्वितीयम्-चर्षणीधृतम् चर्षणीभिर्विद्वद्भिर्धृतमिति।

अन्यद्यथा- द्रुहन्तरः परशुर्न द्रुहन्तरः[34] इत्यत्र द्रुहन्तरः-द्रुमच्छेदकः परशुर्न-परशुरिव। द्रुहन्तरः-द्रोहशीलशत्रूणां हन्ता भवतीति। अत्र द्रुहन्तर इति पदावृत्तिः।अतो यमकालङ्कारः।

## तुल्ययोगिता

तुल्ययोगिताऽलङ्कारस्य लक्षणविषये साहित्यदर्पणकारेणोक्तं यत् –

पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत्।
एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता।।[35] इति

अर्थात् प्रस्तुतानामप्रस्तुतानाञ्च पदार्थानां यत्र गुणक्रियारूपैकधर्मेणाभिसन्धो भवेत्तत्र तुल्ययोगितानामकोऽलङ्कारो भवेदिति। तथा च दृश्यते ऋग्वेदे –

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नम्।।[36]

इत्यस्मिन्मन्त्रे प्रस्तुतानां द्रविण-चित्ति-सुभगत्वादीनां धेहीति एकक्रियासम्बद्धेन तुल्ययोगितानामालङ्कारः।

## अर्थान्तरन्यासः

ऋङ्मन्त्रे अर्थान्तरन्यासालङ्कारस्यापि प्रयोगो दृश्यते। यथा –

मा त्वा सोमस्स ग्लदया सदा याचन्नहंगिरा।
भूर्णिं मृगं सवनेषु चुक्रुधं क ईशानं याचिषत्।। [37]इति

मन्त्रेऽस्मिन् ऋषिरिन्दिरं प्रत्याह- सदा याचमानः सन्नहं सिंहमिव भयङ्करं त्वां मा क्रोधयानीत्याशङ्कया तव क्रोधं सोमस्यास्त्रावणेन स्तुत्या चापनयामि। स्वामिन इन्द्रस्य याचने लौकिकन्यायं दर्शयति – क इन्द्रं न याचिषदिति । लोके को वा पुरुषः स्वामिनं न याचते ? अतोऽहमपि त्वां स्वामिनं याच इति भावः।

अत्र 'क ईशानं न याचिषत्' इति सामान्येन वाक्येन विशेषस्य मेधातिथिकर्तृकस्य इन्द्रकर्मकयाचनस्य समर्थनं क्रियत इत्यतोऽर्थान्तरन्यासोऽलङ्कारः।

एवं प्रकारेण ऋङ्मन्त्रेषूपमाद्यलङ्काराणां निदर्शनं प्राप्यते।

## अन्तटिप्पणी

1. काव्यादर्शः - 2/1
2. काव्यप्रकाशः - 8/67
3. साहित्यदर्पणः – 10/1
4. यजुस्संहिता – 13/3
5. ऋक्संहिता – 5/3/3
6. ऋक्संहिता – 5/6/4
7. ऋक्संहिता – 4/43/4
8. साहित्यदर्पणः –10/14
9. निरुक्तम् (स्क. भा.) – 1 / 2
10. अथर्वसंहिता – 4/18/1
11. ऋक्संहिता – 1/124/7
12. ऋक्संहिता – 1/27/1
13. ऋक्संहिता –5/27/5
14. ऋक्संहिता –2/35/9
15. ऋक्संहिता –1/65/2
16. साहित्यदर्पणः –10/28
17. ऋक्संहिता –7/63/4
18. कठोपनिषद् – 1/3/3-4
19. ऋक्संहिता –10/95/5
20. साहित्यदर्पणः –10/46
21. ऋक्संहिता –1/146/20
22. ऋक्संहिता –4/58/3
23. ऋक्संहिता –1/146/11

24. ऋक्संहिता –10/4/4
25. ऋक्संहिता- 9/5/21
26. साहित्यदर्पणः- 10/6
27. ऋक्संहिता- 10/71/1
28. साहित्यदर्पणः- 10/66
29. ऋक्संहिता- 10/34/9
30. ऋक्संहिता- /10121/2
31. काव्यप्रकाशः- 10/97
32. साहित्यदर्पणः- 10/8
33. ऋक्संहिता- 4/1/2
34. ऋक्संहिता- 1/127/3
35. साहित्यदर्पणः- 10/47
36. ऋक्संहिता- 2/21/6
37. ऋक्संहिता- 8/1/20

## सन्दर्भ


1. अथर्ववेदसंहिता-राथहिट्नीसम्पादिता, बार्लिन, सातवेलकर, पारडी। (1856)
2. अलङ्कारमीमांसा –लेखकः लक्ष्मीनारायणपुरोहितः, सम्पादकः चन्द्रशेखरपुरोहितः, नागप्रकाशकः, ए. यू. ए. जवाहरनगर, दिल्ली।
3. उपनिषद् – गीता प्रेस, गोरक्षपुर । (2013)
4. ऋग्वेदः (बङ्गानुवादः) – रमेशचन्द्रदत्तकर्तृकानुदितः, कलकाता। (1976)
5. ऋग्वेदः सायणभाष्यम् – मैक्समूलरसमपादितः, चौखाम्बा प्रकाशन, वाराणसी। (1960)
6. ऋग्वेदे अलङ्काराः – डा. प्रह्लादकुमारः, मुन्सीराम मनोहरलाल पबलीशर्स प्रा. लि. 54 राणी झांसीरोड, दिल्ली
7. काव्यप्रकाशः- रेवाप्रसादद्विवेदी, काशी हिन्दु विश्वविद्यालयः, वाराणसी। (1981)
8. निरुक्म् – मुकुन्दझा शर्मा , चौखाम्बा, वाराणसी।(2012)
9. वेदेर परिचयः(बङ्गभाषया) – योगीराज बसुः, फार्मा के. एल. मुखोपाध्यायः, कलकाता।(1975)
10. शुक्लयजुर्वेदसंहिता- महर्षिदेवरातः, चौखाम्बा, वाराणसी। (1973)
11. साहित्यदर्पणः – श्रीदर्गाप्रसादद्ववेदी, पङ्कज पब्लिकेशन्स, दिल्ली।(2004)